# Sarvasamarpanagadyam

# सर्वसमर्पणगद्यम्

## Document Information

Text title : Sarvasamarpanagadyam Surrendering everything to the Almighty

File name : sarvasamarpaNagadyam.itx

Category : deities_misc, advice, rAghavendra, gadyam

Location : doc_deities_misc

Author : Raghavendra Swami

Proofread by : Aruna Narayanan

Description/comments : Goes together with Pratah Sankalpa Gadyam

Latest update : August 29, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 29, 2021

*sanskritdocuments.org*

# सर्वसमर्पणगद्यम्

ॐ जाग्रत्स्वप्नसुषुप्त्याख्य-अवस्थात्रयनियामक, मदन्तर्यामि मुख्यप्राणान्तर्गत विश्व-तैजस-प्राज्ञात्मक,
हिङ्कारादिषड्धामप्रतिपाद्य षड्कालनियामक, अनिरुद्ध-प्रद्युम्न-सङ्कर्षण-वासुदेव-वराह-नारसिंह-षण्मूर्त्यात्मक,
स्वहृदयमध्यस्थित-सुषुम्नानाडीदक्षिणपार्श्वस्थित-पञ्चाशत्सङ्ख्याक-पिङ्गळानाडीषु तदुत्तरपार्श्वस्थित-

तावत्सङ्ख्याक-व्यञ्जनवर्णप्रतिपाद्य-तावत्सङ्ख्याकेडानाडीषु तत्तद्योग्य-तत्तत्कालानुसारप्राप्त-तत्तन्नाडीस्थित-बृहतीछन्द-ऋक्सहस्रगत-षड्त्रिंशत्सहस्र-स्वराख्याक्षरप्रतिपाद्य तन्निष्ठ-तन्नियामक-प्रातर्माध्यन्दिनसायमाख्य-सवनत्रय-तत्तत्कालीन-तदभिमानि-वसुरुद्रादित्योपास्य-परमाणुसम्बन्धि-तावत्सङ्ख्याक-अहर्नियामक-अहर्नामक मुख्यप्राणोपास्य-रमायुक्त-पुरुषरूपात्मक प्रादेशमात्रहृदयव्यापक-प्रादेशपरिमितस्थानेशात्मक देहान्तर्गत-देहाङ्गुष्ठपरिमित-जीवान्तर्गत जीवाङ्गुष्ठपरिमित स्वहृदयकमलकर्णिकामूलस्थित-मूलेशात्मक तावत्परिमितकर्णिकाग्रस्थित-बिम्बरूपे जीवेशत्वदृष्ट्याऽनादिकालतः प्राप्तमदीयशुभाशुभकर्मणोर्मध्ये
शुभकर्मानुसारतस्तत्प्रेरितेन मुख्यप्राणेन, तत्त्वाभिमानिदेवताद्वाराऽनुकारित-अवस्थात्रयनियामक-अनुभवकालघटित-श्रीविष्णुस्वातन्त्र्य-स्मृतिप्रदानक नित्य-नैमित्तिक-काम्यभेदेन त्रिविधविद्याश्रित-स्ववर्णाश्रमोचितसङ्कल्पित-भगवत्पूजात्मक कर्मफलजन्यफलेन-अपरोक्षज्ञानात् पूर्वमन्तःकरणशुद्धिद्वारा तदुपासकेन ततः परं भगवदिच्छया प्राप्त निजगुरूपदिष्ट-स्वबिम्बविषयक-पूर्णसच्चिदानन्दात्मक चतुर्गुणाद्युपासन-जिज्ञासाद्युपासादिभिः स्वबिम्बापरोक्षज्ञानोत्पादकेन मनुष्योत्तमानामारभ्य चतुर्मुखपर्यन्तानां पञ्चविधमुक्तियोग्यानां च स्वबिम्बोपासिभिः लिङ्गापगमे स्वरूपानन्दाविर्भाव-वैचित्र्यानन्दप्रदज्ञानेन त्वयि समर्पितेन त्वत्पूजैवास्तु ।

तथा मदीयशुभाशुभ-कर्मणोर्मध्ये-अशुभकर्मानुसारेण त्वत्प्रेरितमुख्यप्राणेन तत्त्वाभिमानि-असुरमारभ्य कलिपर्यन्तानां तमोयोग्यानां पापबाधिभिर्गदायुधप्रदानेन महातमसि-स्थितानां दुःखानुभवेन स्वरूपभूतदुःखातिशयप्रदातेति ज्ञानेन त्वयि समर्पितेन त्वत्पूजैवास्तु ॥

इति श्रीराघवेन्द्राख्ययतिना विरचितं सर्वसमर्पणगद्यं सम्पूर्णम् ।

Proofread by Aruna Narayanan

*Sarvasamarpanagadyam*

pdf was typeset on August 29, 2021

Please send corrections to *sanskrit@cheerful.com*